# Shri Bala Pancharatna Stotram

# श्रीबालापञ्चरत्नस्तोत्रम्

## Document Information

Text title : Shri Bala Pancharatna Stotram

File name : bAlApancharatnastotram.itx

Category : devii, dashamahAvidyA, devI, pancharatna

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : December 25, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# श्रीबालापञ्चरत्नस्तोत्रम्

आई आनन्दवल्ली अमृतकरतली आदिशक्तिः पराई
    माया मायात्मरूपी स्फटिकमणिमयी मामतङ्गी षडङ्गी ।
ज्ञानी ज्ञानात्मरूपी नलिनपरिमली नाद ओङ्कारमूर्तिः
    योगी योगासनस्था भुवनवशकरी सुन्दरी ऐं नमस्ते ॥ १॥

बालामन्त्रे कटाक्षी मम हृदयसुखी मत्तभाव प्रचण्डी
    व्याली यज्ञोपवीती विकटकटितटी वीरशक्तिः प्रसन्ना ।
बाला बालेन्दुमौलिर्मदगजगमना साक्षिका स्वस्तिमन्त्री
    काली कङ्कालरूपी कटिकटिकह्रीङ्कारिणी क्लीं नमस्ते ॥ २॥

मूलाधारा महात्मा हुतवहनयनी मूलमन्त्रा त्रिनेत्रा
    हारा केयूरवल्ली अखिलत्रिपदका अम्बिकायै प्रियायै ।
वेदा वेदाङ्गनादा विनतघनमुखी वीरतन्त्रीप्रचारी
    सारी संसारवासी सकलदुरितहा सर्वतो ह्रीं नमस्ते ॥ ३॥

ऐं क्लीं ह्रीं मन्त्ररूपा शकलशशिधरा संप्रदायप्रधाना
    क्लीं ह्रीं श्रीं बीजमुख्यैः हिमकरदिनकृज्ज्योतिरूपा सरूपा ।
सौः क्लीं ऐं शक्तिरूपा प्रणवहरिसते बिन्दुनादात्मकोटिः
    क्षां क्षीं क्षूङ्कारनादे सकलगुणमयी सुन्दरी ऐं नमस्ते ॥ ४॥

अध्यानाध्यानरूपा असुरभयकरी आत्मशक्तिस्वरूपा
    प्रत्यक्षा पीठरूपी प्रलययुगधरा ब्रह्मविष्णुत्रिरूपी ।
शुद्धात्मा सिद्धरूपा हिमकिरणनिभा स्तोत्रसङ्क्षोभशक्तिः
    सृष्टिस्थित्यन्तमूर्ती त्रिपुरहरजयी सुन्दरी ऐं नमस्ते ॥ ५॥

इति श्रीबालापञ्चरत्नस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Bala Pancharatna Stotram*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*